372.
4

BAHUBIBAHABADA

A DISCOURSE ON THE

HINDU POLYGAMY.

BY

PANDIT TARANATHA TARKAVACHASPATI.



Calcutta:

PRINTED AT THE KAVYAPRAKASHA PRESS.

1872.

To be had from Pandit Jibananda Vidyasagara B. A. Govt. Sanskrit College of Calcutta.

Digitized by Google

बहुविवाहवादः ।

गवर्णमेण्टसंस्कृतविद्यालयाध्यापक-
श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्येण-
विरचितः,
तेनैव संस्कृतः ।

१९१९ संवत्सरे
कलिकातानगर्याम्
सिन्धुरिया-हरिपालस्थ रथ्यायां ७ संख्यभवने
काव्यप्रकाशयन्त्रे
श्रीकालीकुमार-चक्रवर्त्तिना
मुद्रितः ।

1919
Digitized by Google

IndL 2203.5

~~IndL 2203.5~~

HARVARD
UNIVERSITY
LIBRARY

Digitized by Google

बहुविवाहवादः ।

रैर्यं मत्वा दर्शनेऽत्र वेदादिशास्त्रमानतः ।
एकस्य कामतोऽनेकसवर्णापाणिपीडनम् ।
धर्म्यतत्त्वं बहुश्रुतानां बोधनायैव मनुजतिः ।
तेनैव ज्ञातसत्योऽपि न जिनीषाति खेदतः ॥

तत्रादौ विवाहपदार्थो निरूप्यते । विवाहो नाम विजातीयसंस्कारप्रयोजकं ग्रहणम् । ग्रहणञ्च ममेयमिति स्वस्वत्वास्पदीभूततया ज्ञानं स्वत्वञ्च प्रतिग्रहादिजन्यम् । सति च प्रतिग्रहादिना स्वत्वे विजातीयसंस्कारकरणयोग्यत्वात्, असति च स्वत्वे तदसम्भवादित्यन्वयव्यतिरेकाभ्यां स्वत्वस्यैव संस्कारहेतुत्वे तदुपायप्रतिग्रहादीनां तादृशसंस्कारप्रयोजकत्वम् । स च संस्कारः पाण्यादिग्रहणपूर्वकतद्विहितमन्त्रावधिसप्तपदीगमनविहितमन्त्रान्तमन्त्रसमुदायकरणकक्रियाकलापः तज्जन्यादृष्टविशेषो वा सतो गुणान्तराधानस्यैव संस्कारपदार्थतया तादृशक्रियाकलापस्य तज्जन्यादृष्टविशेषस्य वा प्रकृते संस्कारपदार्थत्वौचित्यात् ।

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥

इति मनुना च तथैव प्रतिपादितम्, (मन्त्राः) मन्त्रकरण-

क्रियाकलापाः तज्जन्याहृष्टविशेषा वा आयुर्वै घृतमित्यादि-वदुपचारात्, अन्यथा मन्त्राणां शब्दरूपतया आकाशमात्र-गुणत्वेन दारत्वासम्पादकत्वानुपपत्तेः ।

पाणिग्रहणसंस्कार इति वदता च मनुना विवाहस्य संस्काररूपत्वं प्रकटीकृतम् । प्रकटीकृतञ्च—

विवाहमात्रं संस्कारं शूद्रोऽपि लभते सदेति

स्मृत्यन्तरेण विवाहस्य संस्काररूपत्वम् ।

सपिण्डेभ्यः पिता दद्यात् सुतसंस्कारकर्म्मणि ।
पितृव्याणामहृत्वात्तेषां तदभावेऽपि तत्कृतमादिति ॥

उद्वाहतत्त्वधृतच्छन्दोगपरिशिष्टवचने श्रीहरिनाथादित्युक्तेः उद्वाहस्य संस्काररूपत्वम् अङ्गीकार्यम् । तथा हि संस्कारकर्म्मण्येव पित्रादेः आद्यविधानात् विवाहस्य संस्काररूपत्वाभावे कथङ्कारं तदभिविधिकथनं सङ्गच्छेत । अतएव दशविधसंस्कार-मध्ये विवाहगणनम् ।

अत्र वचने सुतसंस्कारकर्म्मणीत्युक्तेः—

सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने ।

इति मनुवचने दारत्वसंपादके कर्म्मणीत्युक्तेश्च विवाहस्य क्रियाकलापरूपत्वं सुव्यक्तमेव । एवञ्च

अतःपरं प्रवक्ष्यामः कुर्य्याद्दारपरिग्रहमित्यादि ।

याज्ञवल्क्यस्मृतौ विवाहे अप्राप्तप्रापकत्वरूपोत्पत्तिविधित्वम् ग्रहणमात्रस्य विवाहरूपत्वे तस्य च रागत एव प्राप्तत्वेन तदंशे उत्पत्तिविधित्वासम्भवेन तत्र ग्रहणस्य प्राप्तत्वेऽपि प्रागुक्तसंस्कारस्याप्राप्तत्वेन तदंशे एव विधित्वसम्भवः "सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इति न्यायस्य जागरूकत्वात्। अत एव दध्ना जुहोतीत्यादि श्रुतौ होमस्य प्राप्तत्वेन तदंशे उत्पत्तिविधित्वासम्भवेन दध्यधिकरणकत्वमात्रांशे उत्पत्तिविधित्वं मीमांसायामुररीकृतम् उररीकृतञ्च "अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति" इत्यादौ गोविशेषणीभूतारुण्यादेर्विशेषद्वारा क्रयसाधनत्वेन गुणविधित्वम्।

किञ्च तादृशसंस्कारप्रागभावसहकृतग्रहणादेरेव स्वत्वहेतुत्वं न तु तद्विहीनस्य।

मन्त्रादपहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति॥

पराशरभाष्यादिधृतकात्यायनवचनेन राक्षसादौ अपहरणमात्रे,

अग्निर्व्वाचा प्रदत्तायां स्त्रियेतोर्द्धं वरो यदि।
न च मन्त्रोपनीता तु कुमारी पितुरेव सेति॥

उद्वाहतत्त्वधृतवशिष्ठवचनेन वाङ्मात्रदाने उदकपूर्व्वकदाने वा मन्त्रसंस्काराभावे अन्यस्मै देयेति, यथैव कन्या (पितृसम्व-

न्यवती)इति चोक्तेः, प्रतिग्रहीतुः स्वत्वानुत्पत्तेर्भङ्गाक्षेच्च। (मन्त्रोपनीता) मन्त्रकरणकसंस्कारवतीत्यर्थ इति रघुनन्दनः। एवञ्च

प्रदानं स्वाम्यसंस्कारपूर्वमिति ।
यतस् तस्मा प्रदीयते ॥

इत्यादिमन्त्रादिवचने प्रत्यक्षश्रुतिसंस्कारप्रागभावसहकृतदानस्यैव स्वत्वहेतुत्वमङ्गीकार्य्यं सर्व्वसामञ्जस्यात्। अनुत्पद्यमानस्य तु प्रागभावानङ्गीकारात् न दानमात्रात् स्वत्वम्।

किञ्च ग्रहणमात्रस्य विवाहत्वे गृहीतद्रव्यस्य दानविसर्गादिना स्खलनात्रस्यैवोचितत्वे

न पित्र्यविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते इति ।

स्मृतौ विक्रयदानादिना स्खलनिवृत्तिविरहस्योक्तिरनुचिता स्यात्। संस्काररूपत्वे च भार्य्यात्वस्य यावदाश्रयमनुवृत्तेः न क्रयादिना तस्य निवृत्तिरित्युचितमेव। अपरञ्च ग्रहणमात्रस्य यथा कथञ्चित् स्वत्वाधायकत्वेऽपि न समपुण्यापुण्यफलभागित्वोपपादकत्वम् संस्कारविशेषस्यैव दम्पत्योरेकहृदयत्वापादकत्वेन तथात्वस्यौचित्यात्। स्मर्य्यते च भार्य्यायाः पुण्यापुण्यतुल्यत्वम्।

अरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समे इति ।
अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमित्यादि ।

दायभागादिधृतमुन्यादिना च दम्पत्योरेकशरीराधायकत्वेन संस्कारस्य कल्पनात् तथात्वौचित्यम्।

स च संस्कारः दम्पतिनिष्ठः, एकस्यापि संस्कारस्य जाते-

Digitized by Google

ज्यादिन्यायेन उभयनिष्ठत्वाभ्युपगमात् यथा एकेनैव जातेष्ट्यादि कर्म्मणा पुत्रस्य संस्कारः, कर्त्तुः पित्रादेरदृष्टविशेषश्च, यथा वा एकेन आधकर्म्मणा पित्रादिदृष्टिफलकादृष्टं, कर्त्तृनिष्ठादृष्टविशेषश्च जन्यते एवमत्रापीति मीमांसासरणिरनुसरणीया ।

भार्य्याशब्दस्य पतिशब्दस्य च प्रवृत्तिनिमित्तमपि तादृशसंस्कार एव

नोदकेन न वाचा च कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे ॥

निर्णयसिन्धूदाहृतत्वादिष्टवचनेन तथैवोक्तेः

पाणिग्रहणेन जायात्वं, जायत्वं हि
जायापतित्वं सप्तमे पदे इति ।

उदाहृतलघुहारीतवचनेन तथोक्तेश्च

एतदभिप्रेत्यैव रघुनन्दनेन उदाहृतत्वग्नेये "भार्य्याशब्दो हि यूपाहवनीयादिवदलौकिकाङ्गसङ्गेनालौकिकसंस्कारयुक्तस्त्रीवचन" इत्युक्तम् यथा काष्ठमात्रस्य न यूपशब्दवाच्यता न वा वह्निमात्रस्याहवनीयशब्दवाच्यता किन्तु अलौकिकमन्त्रकरणसंस्कारवत्त्वेनैव तत्तच्छब्दवाच्यता एवं भार्य्याशब्दस्यापीति निकर्षः । अत एव

भार्य्याः कार्य्याः सजातीयाः सर्व्वेषां श्रेयसः सदेति ।

दायभागधृतपैठीनसिवचने भार्य्यायाः कार्य्यत्वासम्भवेऽपि सविशेषणे ह्यित्यादि न्यायेन भार्य्यात्वस्य कार्य्यत्वसम्भवेन तथोक्तिः सङ्गच्छते । एवं सिद्धान्ते स्थिते क्वचित् विवाह-

ग्रन्थस्य शोऽयं देवदत्त इत्यादिवत् जहदजहत्स्वार्थलक्षणया विशेष्यमात्रपरत्वमवसेयम् तदभिप्रायेणैव हरिवंशे चित्रभानु-राख्याने—

पाणिपद्मग्रहन्नाया विप्रं चक्रे चतुर्मतिः।
तेन भार्या कृता पूर्वं शतीद्वाहा परस्य वै॥

इत्युक्तम् एवमेव रघुनन्दनभट्टाचार्य्यणामाशयः।

तथा च विधिसमभिव्याहृतस्थले सर्व्वत्र भार्य्यादिशब्दानां विवाहशब्दस्य च संस्काररूपविशेषणपरत्वम् अनुवादाख्याधिकादिस्थले तु ग्रहणपरत्वमिति विवेकः।

एवञ्च विशेष्यीभूतग्रहणस्यैव प्राप्ताप्राप्तविधदानादिप्रयोज्यत्वादृष्टविधत्वं संस्कारस्य तु सर्व्वत्रैव समानत्वम्। अत एव प्रागुक्ते बलादपहृता कन्येत्यादिवचने व्यतिरेकमुखेन संस्कारस्यैव विवाहरूपत्वं व्यक्तमुक्तम्।

गन्धर्वादिविवाहेषु शुभो वैवाहिको विधिः।
कर्त्तव्यश्च त्रिभिर्व्वर्णैः समर्थैर्ब्राह्मणादिभिरिति॥

निर्णयसिन्धुपराशरभाष्यादिधृतदेवलवचने तु

स्पष्टं तथोक्तम्। अत्र त्रिभिरिति विशेषणात् विप्रस्य न तत्राधिकार इति विशेषः।

गन्धर्व्वासुरपैशाचा विवाहा राक्षसश्च यः।
पूर्व्वं परिश्चयस्तत्र पश्चाद्धोमो विधीयते॥

इति निर्णयसिन्धुपराशरभाष्यधृतच्छन्दोगपरिशिष्टवचने च तथैव सुव्यक्तमुक्तम्।

Digitized by Google

तत्रायं विशेषः सवर्णायाः पाणेर्ग्रहणेन संस्कारः, असवर्णानां तु क्षत्रियादीनां विप्रेण शरादेर्ग्रहणेनेति ।

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते स्मृतिः ।
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया इति च ॥

मनुना तथैव प्रतिपादनात् ।

स च विवाहः धनार्जनादिवत् पुरुषार्थ एव न क्रत्वर्थः क्रत्वर्थत्वे यूपादिसंस्काराणामिव प्रतिकर्मावृत्तिप्रसङ्गः । पुरुषार्थत्वेन विहितस्यापि तस्य पत्नीकर्तृकाज्यावेक्षणादिरूपाङ्गसम्पादनद्वारा क्रतूपकारकत्वं न स्वतः, यथा धनार्जनस्य पुरुषार्थत्वेन विहितस्यापि क्रतुसाधनद्रव्यसम्पादनद्वारा क्रतूपकारकत्वं तथा । एवञ्च विवाहस्य धर्मार्थत्वोक्तिः आज्यावेक्षणादिसंस्काररूपाङ्गसम्पादकत्वेनैव, न स्वतः, तस्य पुरुषार्थत्वेनैव विधानादित्यरीकार्य्यम्—व्यक्तीभविष्यति चेदमुपरिष्टात् ।

स च विवाहः त्रिविधः पुत्रार्थो धर्मार्थः रत्यर्थश्च तत्र रतिसुखस्य रागप्राप्तौ तदुपायस्य स्त्रीगमनस्यापि रागप्राप्तौ सत्यां

स्वदारनिरतः सदेति ।

मानववचनस्य परदारान् न गच्छेदिति परिसङ्ख्यापरतायाः सर्व्वैः स्त्रीकारेण परदारगमननिषेधात् तद्व्युदासेन अनिषिद्धस्त्रीगमनं शास्त्रविहितस्त्रीसंस्कारं विनानुपपन्नमिति अनिषिद्धताप्रयोजकः संस्कार आक्षिप्यते । आक्षिप्यते च "औरसपुत्रोत्पत्तिः अनिषिद्धस्त्रीगमनं विनानुपपन्ना" इति औरसपुत्रोत्पत्त्यन्यथानुपपत्त्या शास्त्रविहितः संस्कारः । अत एव

यत्पाणिग्रहणसंस्कृतायां सवर्णासूपादधेत्तु यम् ।
औरसं तं विजानीयादिति ॥

स्मृतावौरसशब्दनिर्वचनाय संस्कृतायामित्युक्तम्

अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा ।
दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह—

इति मनुना च अपत्यादेर्दाराधीनत्वं प्रतिपादितम् तेन विवाहस्य अपत्याद्यर्थत्वलाभः । तत्र—

पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्त एतादृ

दायभागधृतवचनेन पुन्नामकनरकनिस्तारकत्वेन पुत्रशब्दनिर्वचनात् पुत्रस्य नरकरूपदुःखनिवृत्तिरूपस्य स्वतः-प्रयोजनस्य साधनत्वेन पुरुषार्थत्वम् 'परदारान् न गच्छेत्' इत्यादिशास्त्रेण परदारगमनस्य निषेधेन तत्परिहारेण स्वाभिगमसाध्या पुत्रोत्पत्तिः भार्यात्वरूपसंस्कारं विनानुपपत्त्यनुपपत्तिज्ञानसहकारेण पुत्रादेर्दाराधीनत्वं कल्प्यम् । सस्त्रीको धर्ममाचरेदित्यादिशास्त्रेण धर्मकार्येषु दम्पत्योः सहाधिकारप्रतिपादनेन धर्मकार्याणां दाराधीनत्वम् तच्च धनवान् सुखीत्यादौ विशिष्टवैशिष्ट्यावगाहिबोधमर्यादया विशेषणीभूतधनादीनां यथा प्रयोज्यतया सुखादावन्वयस्तथैव दाराणां धर्मे प्रयोज्यतयाऽन्वयेन धर्मादेर्दारप्रयोज्यतालाभः । गार्हस्थ्योचितधर्ममाचाणां फलत्वकथनाय धर्मकार्या-

णीत्युक्तम्। दुःखाभिन्नसुखस्वरूपस्वर्गस्य मुख्यप्रयोजनतया तदुपायभूतधर्मादेः पुरुषार्थत्वम्। एवमलौकिकसंस्काररूपभार्य्यत्वस्य अलौकिकादृष्टद्वारा मुख्यप्रयोजनद्वयार्थत्वमभिधाय लौकिकसुखसम्पादकस्य शुश्रूषादेस्तत्फलत्वमन्तोऽभिहितम्। तत्रापि शुश्रूषायाः असंस्कृतदासादिसाध्यतया अनैकान्तिकत्वात् न विवाहफलत्वम् किन्तु रतेरेव, तथा च रतिफलोद्देशेनैव कृते विवाहे नान्तरीयकविधया शुश्रूषादिसम्भवः इति विवाहस्य न तदर्थत्वम्। किञ्च विवाहजन्यसंस्कारस्य दम्पतिनिष्ठतया दम्पतिगतयोरेवापत्यधर्म्मकार्य्ययोर्यथा विवाहप्रयोजनत्वम् एवमुभयनिष्ठरतिसुखसाधनत्वेन रतेरेव विवाहार्थत्वं युक्तम् न शुश्रूषाजन्यसुखस्य, तस्य पतिमात्रनिष्ठत्वादैकान्त्याभावाच्च इति दम्पतिनिष्ठसंस्कारस्य न तत्प्रयोजनत्वम्। इत्थं लौकिकसुखसाधनस्य रतेरेव विवाहप्रयोजनत्वमुक्तम्। तच्च अनिषिद्धस्त्र्यभिगमजन्यं रतिसुखं विवाहसंस्कारं विनानुपपन्नमित्यनुपपत्तिज्ञानसहकारेण कल्प्यते। यद्यपि धर्म्मार्थविवाहेनैव स्त्रियाः संस्कृतत्वात् तदभिगमनस्यानिषिद्धत्वात् अनिषिद्धस्त्रीगमनसिद्धेः विवाहस्य रतिफलत्वकल्पनमनुचितम् तथापि रतिरुक्तमेति विशेषणात् उत्कृष्टरतेश्च बहुस्त्रीसाध्यतया बहुस्त्रीविवाहस्य उत्कृष्टरतिसाधनतया तत्फलत्वम्।

इत्येवं विवाहस्य अपत्यादित्रितयप्रयोजनत्वं प्रथमार्द्धे दर्शितम्। उत्तरार्द्धे तु धर्म्मकार्य्याणां स्वर्गद्वारैव, अपत्यस्य

पितॄणामात्मनश्च स्वर्गसाधनत्वेनैव विवाहप्रयोजनत्वमित्येव दर्शितम् न तु स्वर्गस्य पृथक् प्रयोजनत्वम्—अपत्याद्यर्थत्वकथनेनैव गतार्थत्वात् । अपत्यस्य स्वर्गसाधनत्वन्तु

पुत्रेण च लोकान् जयति पौत्रेणानन्त्यमश्नुते इत्यादिना लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः ।

इत्यादियाज्ञवल्क्यवचनेन च प्रतिपादितम् तस्यैवेदम् । एवं स्थिते विवाहस्य त्रिविधफलत्वे

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने इति

मनुवचने मैथुन इति पदेन प्रागुक्तत्रितयफलग्रहणम् मैथुने (स्त्रीपुंसरूपमिथुनसाध्ये) अग्न्याधानपुत्रोत्पत्तिरतिरूपफलत्रये न तु योगरूढ्या लोकप्रसिद्धरतिमात्रे । आख्यातञ्च स्मार्त्तभट्टाचार्य्येणापि उदाहृतत्वे तथैव । अपत्यधर्म्मकार्य्यादीनां येषामेव स्वयं विवाहफलत्वं सन्दर्शितम् तेषामेव मैथुनशब्दवाच्यता युक्तेत्येवमवसीयते सप्तमी निमित्तार्थे मैथुननिमित्ते दारकर्म्मणीत्यर्थः ।

एतत् सर्व्वमभिसन्धाय विज्ञानेश्वरेण मिताक्षरायामाचाराध्याये रतिपुत्रधर्म्मार्थत्वेन विवाहस्त्रिविध इत्युक्तम् ।

मनुवचने विवाहफलकथने रतेरन्ते निवेशेऽपि तत्र रतिशब्दस्य पूर्व्वनिर्द्देशः हरिहरावित्यादौ हरेरिव रतिशब्दस्य घन्तत्वात्, कुम्भकाग्रमित्यादाविव लघुत्वरत्वाद्वा समर्थनीयः ।

Digitized by Google

ततश्च रतिशब्दस्य द्वन्द्वे पूर्व्वनिर्द्दिष्टेऽपि विधिकाले सर्व्वान्ते परामर्श इति न काचिदनुपपत्तिः।

इत्येवमर्थवादोल्लिखितफलत्रयानुसारेण पुत्रकामो विवहेत्, धर्म्मकामो विवहेत्, रतिकामो विवहेत् इत्येवं विधित्रयं कल्प्यं यद्यपि मनुवचने समुचितपुत्रादिफलश्रुतेः समुचितफलार्थतया एक एव विधिः कल्पयितुं युक्तः तथापि

पुत्रार्थे क्रियते भार्य्या पुत्रः पिण्डप्रयोजन इति वचने
लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः।
यस्मात् तस्मात् स्त्रियः सेव्या भर्त्तव्याश्च सुरक्षिता इति।

याज्ञवल्क्यवचने च प्रत्येकफलश्रुतेः प्रत्येकफलार्थत्वेनापि विधयन्तरकल्पनावश्यकी। कल्पितेषु च तेषु विधयन्तरेषु न समुचितफलार्थत्वेन विशिष्टविधिकल्पना निष्प्रयोजनत्वात् अत एव यः पशुकाम इत्यादिना प्रतिपदादिषु एकैकफलकतया तत्तद्यागं विधाय सर्व्वेभ्यो दर्शपौर्णमासावित्यादिना प्रतिपदादिषु पश्वादिफलकत्वेन विहितानामपि सर्व्वशब्देन प्रत्येकरूपेणैव परामर्शात् समुचितरूपेण न तत्र तत्तत्फलार्थत्वेन दर्शादेर्विधानम् अपि तु प्रत्येकफलार्थत्वेन तत्तत्कामनासहकारेण च दर्शादेः प्रयोगभेदेनैव तत्तत्फलसिद्धिरिति

योगसिद्धिर्व्वार्थस्योत्पत्तिप्रयोगित्वादिति

जैमिनिना योगसिद्ध्यधिकरणे सिद्धान्तितं तदनुसारेणाचापि प्रत्येकफलार्थत्वेन विधित्रयकल्पना। तत्र सर्व्वेभ्य इति सर्व्वशब्दस्यैव

Digitized by Google

तथा हि यज्ञियः पशून् पुरुषार्थान् वनुते।

इति भट्टभाष्यधृतस्मृतौ सर्व्वानिति सर्व्वशब्दस्य त्रयाणा-विशेषात्।

पुरुषस्य दृष्टार्थाः मन्वाद्युक्ता एव अपत्यादयः दृष्ट प्राप्ताः नतु धर्म्मार्थकामरूपाः, स्त्रिया अर्थसाधनत्वस्य क्वचिदप्यनुक्तेः अर्थस्य विवाहफललाभावात्। तत्र क्वचित् अपत्यं, क्वचित् धर्म्मः, क्वचिच्च उत्कृष्टरतिः फलत्वेन श्रुतम् तदेव सर्व्वशब्देन परामृष्टं, मनुना तु तानि समुचित्य एकत्र दर्शितानीति विशेषः। वस्तुतः तत्रापि प्रत्येकवाक्येन प्रत्येकस्य फलत्वमुक्तं न तु समुदितानामिति न समुचितफलकत्वमिति तत्तत्फल-कामनैव तत्तदधिकारप्रयोजिका। दृष्टांस्तु विशेषः यदि कामनान्तरविरहस्तदा धर्म्मार्थविवाहेनैव स्त्रियाः संस्कारा-पादनात् तच्च अनिषिद्धरतेः, तदधीनपुत्रोत्पत्तेश्च नान्तरीय-कविधया उभयफलसिद्धौ न तदर्थं विवाहकरणावश्यकता धर्म्मविवाहेनैव सकलफललाभान्न तत्र प्रवृत्तिः।

एतच्चा बहवः पुत्रा यद्यप्येको गयां व्रजेदिति

पराशरभाष्यधृतपुराणवचनात् गौणमुख्यबहुपुत्रेच्छायां, विशिष्टरतिकामनायाञ्च तत्तत्कामनयापि विवाहान्तरं कर्त्तुं शक्यते एव उपपादयिष्यते चैतद् परिष्टात्।

एवं त्रिविधफलार्थत्वेन विवाहत्रैविध्ये मन्वादिभिः स्मृत्यादि-बोधिते विज्ञानेश्वरादिभिरनुमोदितेऽत्र स्थिते विख्यातकीर्त्तिना कल्याणभाजनेन विद्यासागरेण नित्यनैमित्तककाम्यभेदेन

विवाहवैविध्यं यदभिहितं तत् किं मन्वादिशास्त्रोपलब्धम् ? उत स्वप्नोपलब्धम् ? अथ स्वयेमुषीप्रतिभासलब्धं ? वा तत्त्व

नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते इति ।

स्नानस्य यथा त्रैविध्यप्रतिपादकशास्त्रमुपलभ्यते एवं शास्त्रोपलम्भाभावान्नाद्यः, न च तथा शास्त्रं दृश्यते न वा तेनाप्युपलब्धम् । 'ग्रन्थी भवति पण्डित' इत्युक्तिमनुसृत्य संस्कृतपाठशालातो गृहीतप्रकटभारपुस्तकेनापि तेन यदि किञ्चित् प्रमाणमदृश्यत तदा निरदेक्ष्यत न च निरदेक्षि । नापि तत्र कस्यचित् ग्रन्थस्य सम्मतिरक्षि । अतः प्रमाणोपन्यासमन्तरेण तद्वचनमात्रे विश्वासभाजः संस्कृतानभिज्ञजनान् प्रत्येव तच्छोभते न तु प्रमाणपरतन्त्रान् तान्त्रिकान् प्रति । अथ स्वप्नोपलब्धं तदा आम्रामोदकवत् तस्यैव मोदाय, नान्येषां ज्ञातसिद्धान्तानाम् ।

अतोऽसहायं स्वयेमुषीप्रतिभासमात्रमवशिष्यते तत्रापि युज्यते सोऽयं तस्य स्वयेमुषीप्रतिभासः किं युक्तिमवलम्ब्य ? तदनवलम्ब्य स्वेच्छामात्रेण ? वा न तावत् युक्त्यनुसारी । तथा हि विवाहस्य त्रैविध्यं यत् प्रतिज्ञातम् तत् कस्मात् हेतोः ? किं विवाहस्वरूपनिर्व्वाहकारणभेदात् ? उत फलभेदात् ? आहोस्वित् धर्म्मभेदात् ? नाद्यः आद्याद्यष्टविधविवाहाङ्गदानक्रयापहरणादिवत् तादृशत्रयस्य कारणभेदाभावात् । नापि द्वितीयः अस्मत्प्रतिदर्शितफलभेदवत् तदुक्तत्रैविध्ये फल-

भेदाभावात् । न द्वितीयः धर्म्मभेदमात्रेण भेदस्वीकारे प्रमेयत्ववाच्यत्वादिना अनन्तभेदापत्तेः । अथ परस्परव्यावृत्त-धर्म्मभेदात् तथा कल्पनमित्युररीक्रियते इति चेत् तथापि न निस्तारः सर्व्वविवाहानां काम्यत्वस्य व्यवस्थापनेन तदङ्गी-कृतनित्यविवाहेऽपि काम्यत्वानिवृत्तेः पत्नीमरणनिमित्तक-विवाहे च नैमित्तिकत्वानपायात् परस्परव्यावृत्तधर्म्मत्वाभावात् । यथा च विवाहमात्रस्य काम्यत्वं तथा प्रतिपादितं पुर-स्तात् । किञ्च

अविप्लुतब्रह्मचर्य्यो लक्षण्येन्तु तमावसेदिति ।

मिताचराधृतवाक्यात् ब्रह्मचर्य्यातिरिक्ताश्रममात्रस्यैव रागप्रयुक्तत्वात् गृहस्थाश्रमस्यापि रागप्रयुक्ततया तदधीन-प्रवृत्तिकविवाहस्यापि रागप्रयुक्तत्वेन काम्यत्वस्यैवोचितत्वम् ।

इत्थमसौ तस्य प्रेमुषीप्रतिभाषः तद्वाक्ये विश्वासभाजः संस्कृतभाषापरिचयशून्यान् जनान् भ्रमयन्नपि अस्मत्तर्कचक्रे निपतितः भ्रमनुयोगदण्डेन भ्राम्यमाणः न क्वचित् विश्रा-न्तिमास्वादयिष्यति उपयास्यति च दुर्गमे अतिगभीरे शास्त्र-जलाशये अस्मत्तर्कावष्टम्भेन सातिशयरयशालिसलिलावर्त्तेन परिवर्त्यमानोलुपवत् बम्भ्रम्यमाणभावम्, नाप्स्यति च तलं कूलं वा, आपत्स्यते चास्मत्प्रदर्शितया प्रमाणानुसारिण्या युक्त्या वात्यया घूर्णायमानधूलिचक्रमिव निरालम्बपथम् । अतः कूल-कलनाय उपदेशकान्तरकर्णधारालम्बनेन सद्युक्तितरणिरनु-

सरणीयाऽवलम्ब्यतां वा विश्रान्त्यै अवलम्बान्तरम्। अथ युक्त्यनादरेण स्वेच्छया तथा बुद्धिप्रतिभासश्चेत् स्वेच्छाचारिणमेव समादराय प्रभवन्नपि न प्रमाणपदवीमवगाहते।

अथ विवाहस्य त्रैविध्यावान्तरभेदेषु नित्यत्वं यदुररीकृतम् तत् कस्मात्? हेतोः, किं तद्विना विवाहस्वरूपासिद्धेः? उत विवाहफलासिद्धेः? उत शास्त्रप्रमाणानुसारित्वात्? नाद्यद्वितीयौ नित्यत्वं विनापि विवाहस्वरूपफलानां सिद्धेः, न हि नित्यत्वं विवाहस्वरूपनिर्व्वाहकं केनाप्युररीक्रियते फलासिद्धिप्रयोजकत्वं तु सुदूरपराहतं नित्यकर्म्मणः फलनैयत्याभावात्। तृतीयः पक्षः परिग्रिह्यते तत्रापीदमुच्यते प्रतिज्ञामात्रेण साध्यसिद्धेरनभ्युपगमात् हेतुभूतप्रमाणस्य तत्रानिर्देशान्न तस्य साध्यसाधकत्वम्। अथ अकरणे प्रत्यवायानुबन्धित्वमेव नित्यत्वे हेतुरुच्यते। अकरणे प्रत्यवायानुबन्धित्वनिर्णयस्यापि बलवदागमसाध्यत्वात् आगमस्य च तत्रानिर्देशात् कथङ्कारं तादृशहेतुना साध्यसिद्धिः निश्चितहेतोरेव साध्यसिद्धेः प्रयोजकत्वात् प्रत्युत

यदहरेव विरजेत् तदहरेव प्रव्रजेदब्रह्मचर्य्याद्वा गृहाद्वा वनाद्वेति।

श्रुत्या वैराग्यमात्रतः प्रव्रज्याया उक्त्या गृहस्थाश्रमस्य नित्यत्वबाधनात्

अथेतरथा ब्रह्मचर्य्यो यमिच्छेत्तु तमावसेदिति।

प्रागुक्तवचनेन गृहस्थाश्रमादेः इच्छाधीनत्वोक्तेः, नैष्ठिक-

Digitized by Google

ब्रह्मचारिणश्च गृहस्थाश्रमाभावस्य सर्व्वसम्मतत्वाच्च । एवं तन्नित्यत्वाभावे तदधीनप्रवृत्तिकस्य विवाहस्य कथं नित्यत्वं स्यात् ।

अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः ॥

इति दक्षवचने तु द्विजानामाश्रममात्रस्यैव अकरणे प्रत्यवायानुबन्धित्वकथनेऽपि गृहस्थाश्रममात्रस्य नित्यत्वाप्राप्तेः अत्र च द्विजपदस्योपलक्षणपरत्वं यदभिहितं तदपि प्रमाणसापेक्षित्वात् प्रमाणस्य चानुपन्यासादुपेक्ष्यमेव ।

न च अन्यतमाश्रमस्य नित्यत्वे गृहस्थाश्रमस्यापि नित्यत्वं सत्स्यति इति वाच्यं ब्रह्मचर्य्याश्रमस्य सकलधर्म्मतन्त्रस्यैव नित्यत्वेन तन्निष्ठस्य रागप्राप्तत्वेन काम्यत्वात् । वस्तुतः ब्रह्मचर्य्याभिन्नाश्रमस्य यथाकथञ्चित् नित्यकाम्यत्वसिद्धावपि विवाहस्य केवलनित्यत्वं कथं सेत्स्यति ? । न च नित्याङ्गस्य नित्यत्वमर्थसिद्धमिति नियमोऽस्ति तथा सति

अरण्यः सन्ध्यामुपासीतेति श्रुतौ ।
यदोपवीतिना भाव्यमिति ।

श्रुतौ च नित्यत्वव्यापकवीप्सायदादिपदादिवैयर्थ्यापत्तेः नित्याश्रमाङ्गतयैव तयोः नित्यत्वप्राप्तेः । अथ नित्याग्निहोत्रादिषु पत्न्याद्याश्वेषणादेर्नित्यत्वेन पत्नीत्वं च विवाहमन्तरा न सम्भवतीति विवाहस्य नित्यत्वमिति चेन्न खादिरयूपस्य यज्ञाङ्गतया संस्कारविधानात् 'प्रतिप्रधानं गुण आवर्त्तते' इति न्यायेन

प्रतियज्ञं यथा यूपसंस्कार आवर्त्यते एवं विवाहस्यापि प्रतियज्ञम् आवृत्तिप्रसङ्गात्। तथाकल्पने च बहुविवाहं निषेधतस्तस्य अनन्तविवाहविधानप्रसङ्गः मूषिकभिया पलायमानस्य भुजङ्गमसुखपतनमनुहरति अनुहरति च गृहकुटीप्रभातदृष्टान्तम्, यथा शुल्कहानभिया विपथेन धावमानस्य दुष्टवणिजः गृहकुटीसमीपे प्रभाते जाते आयासवैयर्थ्यम् एवं विपथेन धावमानस्य पुनर्बहुविवाहप्रसङ्गात् आयासवैफल्यम्। अतः उभयतः पाशावबन्धनं कथमुत्तीर्य्येत।

अथ अग्न्याधाननित्यत्वात्तस्य चैकत्वात् तदङ्गतया नित्यत्वमिति न प्रतिकर्म्मावृत्तिप्रसङ्ग इति चेत् तथापि न निस्तारः अग्नौ नष्टे दुष्टे वा पुनरग्न्याधानस्य विधानेन तदर्थं पुनर्व्विवाहप्रसङ्गात् तथाच बहुविवाहनिषेधनं रिक्तं स्यात्। अथ विवाहजन्यसंस्कारस्य दम्पतिनिष्ठतया आधानादिकर्त्तृपतिनिष्ठत्वानपायात् न प्रतिकर्म्मावृत्तिप्रसङ्गः 'कर्तृसंस्कारकाङ्गानां प्रतिकर्म्मनिवर्त्तनम्' इत्यभियुक्तोक्तेरिति चेन्न "साधारणासाधारणयोर्म्मध्येऽसाधारणे कार्य्यसंप्रत्यय" इति न्यायेन कर्तृमात्रनिष्ठानामेव स्नानाचमनादीनां प्रतिकर्म्मनिवर्त्तनसिद्धान्तात् विवाहजन्यसंस्कारस्य तु कर्तृमात्रनिष्ठत्वाभावात्। अथ गृहस्थाश्रमस्य नित्यकाम्यत्वेन नित्यत्वानपायात्

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
तया हि सहितः सर्व्वान् पुरुषार्थान् समश्नुते इति

याज्ञवल्क्यवचनेन गृहिण्या एव गृहशब्दार्थत्वप्रतिपादनात्

Digitized by Google

ज्ञातविवाहस्यैव गृहस्थशब्दार्थत्वप्राप्तौ विवाहस्यैव गृहस्थाश्रमत्वान्नित्यत्वमिति चेत् न 'न गृहमित्यादिवाक्यस्य प्रशंसार्थवादपरतया स्वार्थे तात्पर्य्याभावेन गौणत्वात् अत एव तथा हीति हिशब्देन तस्याः पुरुषार्थहेतुत्वेन गृहशब्दस्योपचारः प्रदर्शितः। असति तथात्वे तथा हीत्यादि नारभेत। अत एव

द्वितीयमायुषो भागं कृतदारो गृहे वसेदिति।

मनुना दारकर्म्मगृहवासयोर्भेदेनोत्कीर्त्तनम्। अथ गृहस्थाश्रमसाधनत्वेन तस्य नित्यत्वं स्यादिति चेन्न गृहस्थाश्रमसाधनभूतानां धनार्ज्जनादीनामपि नित्यत्वापत्तेः उभयेषामपि पुरुषार्थत्वाविशेषात्

अथ नापुत्रस्य लोकोऽस्तीति।

अलोकतापरिहारार्थत्वेन पुत्रोत्पत्तेर्नित्यतया तदङ्गत्वेन विवाहस्य नित्यत्वमिति चेन्न नित्याङ्गमात्रस्य नित्यत्वप्रत्याख्यानात् अन्यथा पुत्रेष्टियागादेरपि नित्यत्वापत्तेः। वस्तुतः नित्यकर्म्मप्रयोगान्तर्भूताङ्गानामेव नित्यत्वं न तु तदहिर्भूतानां, विवाहस्य तु अग्न्याधानादिगृहस्थधर्म्मानन्तर्गतत्वात् न तदङ्गत्वेन नित्यत्वम्।

किञ्च भवतु नाम साग्निकस्य कथञ्चित् विवाहस्य नित्यकाम्यत्वं केवलनित्यत्वं तु सर्व्वथा न सेत्स्यति तथा च काम्यत्वेन सह साङ्कर्य्यात् न विभाजकोपाधित्वम्।

यदपि विभाजकोपाधितया नैमित्तिकत्वमुररीकृतं तच्चेदमुच्यते। किमिदं नैमित्तिकत्वम्? किं निमित्ताधीनत्वम्?

Digitized by Google

निमित्तनिश्चयाव्यवहितोत्तरकर्त्तव्यत्वं? वा, न तावदाद्यः कार्य्यमात्रस्य कारणसाध्यतया सर्व्वस्यैव नैमित्तिकत्वापत्तेः एवञ्च तदभिमतनित्यविवाहस्यापि दानादिप्रयोज्यतया निमित्ताधीनत्वेन नैमित्तिकत्वापत्तिः। न द्वितीयः पत्नीमरणनिश्चयाधीनस्य तन्मते नित्यस्य द्वितीयविध्यनुसारिविवाहस्यापि नैमित्तिकत्वापत्तेः तस्य अग्नौकरणादेरिव मरणनिमित्तनिश्चयाधीनत्वात्। किञ्च तन्मते द्वितीयविध्यनुसारिविवाहस्य नैमित्तिकस्यापि नैमित्तिकत्वानुपपत्तिः तस्य शुद्धकालप्रतीक्षाधीनतया वक्ष्यमाणाष्टवर्षादिकालप्रतीक्षासद्भावेन च निमित्तनिश्चयाव्यवहितोत्तरं क्रियमाणत्वाभावात्। अन्यच्च

नैमित्तिकानि काम्यानि नित्यानि यानि यानि च।
तानि तानैव कार्य्याणि न कालस्तु विधीयते॥

इत्युक्तेः लुप्तसंवत्सरमलमासशुक्रास्तादिशुद्धकालेऽपि द्वितीयविध्यनुसारिणो नैमित्तिकस्य कर्त्तव्यतापत्तिः नैमित्तिके जातेष्ट्यादौ अग्नौकरणादेः शुद्धकालस्य च प्रतीक्षाभावस्य सर्व्वसम्मतत्वात् तत्प्रतीक्षणाभावापत्तेर्दुस्तरत्वात्। मन्वादिभिश्च

वन्ध्याष्टमेऽधिवेत्तव्या दशमे स्त्री मृतप्रजा।
एकादशे स्त्रीजननी इत्यादिना।

अष्टवर्षादिकालप्रतीक्षां वदद्भिः प्रदर्शितनैमित्तिकत्वं तस्य प्रत्याख्यातम्।

इत्थं विवाहस्य केवलनित्यत्वं केवलनैमित्तिकत्वञ्च चैवि-

Digitized by Google

श्रविभाजकोपाधितया तेन यत् प्रमाणमन्तरेणैव कल्पितं तत् प्रतिक्षिप्तं तच्च दिग्गजटपुस्तकभाराहरणेन उपदेशसहस्रानुसरणेन वा तेन समाधेयम् ।

एवं विपक्षपक्षप्रतिक्षेपेण स्वपक्षसमर्थनेन च रतिधर्म्मपुरुषार्थतया तत्तत्कामनाभेदेन विवाहत्रैविध्ये स्वेच्छानमासादिते सम्प्रति प्रागुक्तविधित्रयशेषतया विवाहक्रियाकर्म्मविशेषतद्गतसंख्याविशेषयोश्चावधारणार्थमुत्तरो ग्रन्थ आरभ्यते । तत्र रत्यादिकामो विवहेदित्यादौ विधित्रये हि "का विवहेदिति ?" (कति वा विवहेदिति) च ? भवत्यपेक्षा, तदपेक्षायाञ्च

तस्मादेको बह्वीर्विन्दतेति श्रुतिः ।

तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सह पतय इति श्रुतिः ।

भार्य्याः कार्य्याः सजातीयाः सर्वेषां श्रेयस्यः स्युरिति

दायभागधृतपैठीनसिस्मृतिश्च विवाहक्रियाकर्म्मगतसंख्याविशेषबहुत्वं ख्यापयन्ती एकस्यानेकविवाहं प्रतिपादयति । तत्र द्वितीयश्रुतौ नैकस्यै बहवः सह पतय इति सहशब्दोत्कीर्त्तनेन पुरुषस्य बहुजायाविधानपक्षेऽपि सहशब्दस्याकर्षणौचित्यात् सह बह्व्यो जाया भवन्तीत्यर्थलाभेन एकदापि बहुजायासम्भवः, सहशब्दाकर्षणाभावे तु कालभेदेन बहुविवाहस्वेष्टत्वेस्त्रीपक्षेऽपि विधवाविवाहवादिनस्तस्मते दृष्टतया वैलक्षण्याभावात् अतः स्त्रिया यद्विषयकबहुविवाहनिषेधः तद्विषय एव पुरुषस्य बहुविवाह इत्येवं वैलक्षण्यसम्पादनाय सहशब्दाकर्षण

मवश्यं कर्त्तव्यम् । एवञ्च कालभेदेन बहुविवाहसमर्थनम् उत्तरवाक्यस्थसहशब्दसमाकर्षणाभावमूलम् तथा सति च उभयोर्वाक्ययोर्युगपद्विषयकत्वेन पुरुषात् स्त्रिया वैलक्षण्याभिधानं सङ्गतं स्यात् । असति च तत्समाकर्षणे एकविषयकत्वाभावेन वैलक्षण्याभिधानमसङ्गतं स्यात् । अत एव

अथ यदि ब्रह्मणो द्वे भार्ये विन्देत कथं कुर्यादिति

आश्वलायनः

यस्मिन् काले विन्देतोभावग्नी परिचरेदित्युपक्रम्य
द्वयोर्भार्ययोरग्नीनाधायाग्निहोत्रं जुहुयात् द्वयोर्भार्ययोरग्नीनारब्धयोर्यजमान इति

विधानपरिजातधृतबौधायनसूत्रेण युगपद्भार्याद्वयं तदनुगुणमग्निद्वयञ्च विहितं द्वयोः पत्न्योरग्नीनारब्धयोरिति वदता चाग्निद्वये युगपत् तयोर्होमादिसम्बन्धप्रतीतेर्युगपद्विवाहद्वयं स्पष्टमेव प्रतीयते तत्रापि द्विपदं बहुलस्याप्युपलक्षणं पूर्व्वोक्तश्रुतौ बहुलश्रवणात्

नैकयापि विना कार्य्यमाधानं भार्यया द्विजैः ।
अकृतं तद्विजानीयात् सर्वाभिर्नारभेत यदिति ॥

पराशरभाष्यधृतकात्यायनवचनेन, तदुल्लिखितेन "एककृतमकृतमेवेति" न्यायेन च व्यतिरेकेण सर्व्वाभिः सहाधानविधानेन युगपद्बहुपत्नीसम्बन्धप्रतीतेः ।

एकैकामेवासां संनह्यादेकैकां गार्हपत्यमीक्षयेत् ।
एकैकामाज्यमवेक्षयेदिति ।

पराशरभाष्यधृतबौधायनसूत्रे बह्वीनां मध्ये एकैकद्वारा सकृद्ग्रहणादिविधानात् भार्य्याणां बहुत्वप्रतीतेश्च ।

यदेकस्मिन् यूपे द्वे रशने परिव्ययति ।
तस्मादेको द्वे भार्य्ये विन्देतेति ।

श्रुतिवाक्यस्यापीयमेव विषयकत्वम् । एवञ्च तस्य कालभेदेन बन्ध्यत्वादिकारणाधीनविवाहविषयकत्वकल्पनं साहसमात्रम् बौधायनसूत्रे युगपद्द्वयोर्भार्य्ययोर्विधानात् । किञ्च स्मृतिवाक्येन श्रुतिसङ्कोचस्य कल्पने स्वस्यैव विस्मृत्यकारिता व्याहन्येत । तेनैव विधवाविवाहद्वितीयपुस्तके १८८ पृष्ठे

श्रुतेर्वेदविरोधे तु परित्यागो यथा भवेदिति

प्रयोगपारिजातस्मृतिवाक्यस्य, प्रथमपुस्तके ११ पृष्ठे च

श्रुतिस्मृतिपुराणानां विरोधो यत्र विद्यते ।
तत्र श्रौतं प्रमाणं तु तयोर्द्वैधे स्मृतिर्वरेति ॥

व्यासवाक्यस्य च स्वयंग्रहस्मितत्वेन इदानीं स्वाभीष्टसिद्धये तद्विरुद्धार्थकल्पने कथङ्कारं विस्मृत्यकारितामात्मनः परिरक्षेत् ।

अत एव बलाबलाधिकरणे

विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति सूत्रेण

जैमिनिना श्रुतिविरोधे स्मृतेरननुष्ठानलक्षणमप्रामाण्यं व्यवस्थापितम् ।

Digitized by Google

एवञ्च श्रुतौ तदनुसारिपैठीनसिस्मृतौ च बहुभार्य्या-विधानात् तन्मूलके

एकस्य बह्व्यो विहिता महिष्यः कुरुनन्दन ! ।
नैकस्या बहवः पुंसः श्रूयन्ते पतयः क्वचिदिति ।

महाभारतवाक्ये श्रूयन्ते इत्यनेन एकस्य बहुभार्य्याणां श्रौतत्वेन कीर्त्तनम्। एतामेव श्रुतिमनुरुन्धानैव

लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः ।
यस्मात्तस्मात् स्त्रियः सेव्या भर्त्तव्याश्च सुरक्षिताः ॥

इति याज्ञवल्क्यस्मृतिः स्त्रिय इति बहुवचनं निरदिक्षत् निरदिक्षच्च पैठानसिस्मृतिः

भार्य्याः कार्य्याः सजातीयाः सर्व्वेषां श्रेयस इति ।

भार्य्या इति वचनम्।

न च प्रत्येकवर्णाभिप्रायेण बहुवचनमुपात्तमिति शङ्क्यम् प्रत्येकवर्णाभिप्रायकत्वे

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्म्मणीति

मानववचन इव भार्य्या कार्य्येत्येकवचननिर्द्देशेनैव तथार्थावगतौ बहुवचननिर्द्देशवैयर्थ्यापत्तेः। श्रुतौ एकस्य बहुभार्य्याविधानस्योक्तया तदेकवाक्यत्वस्योचितत्वात्।

एतेन प्रागुक्तश्रुतिस्मृती सवर्णासवर्णागतबहुत्वविषयिके बन्ध्यत्वादिकारणाधीनबहुत्वविषयिके वेति कल्पनमप्यपास्तम् पैठीनसिवचने सजातीया इत्यनेन सवर्णागतबहुत्वस्यैव प्रतिपाद-

नात् प्रागुक्तेन बौधायनसूत्रेण च द्वयोः पत्नीरग्न्यारभ्यो-रित्यनेन अग्न्याधाने द्वयोः पत्नीः सङ्काधिकारं प्रतिपाद्य-ता सवर्णागतबहुत्वस्यैव प्रतिपादनात्,

अग्निहोत्रादिशुश्रूषा बहुभार्यः सवर्णया।
कारयेत्तद्बहुत्वे च ज्येष्ठया गर्हिता न चेत् ।

इति पराशरभाष्यादिधृतकात्यायनवचनेन सवर्णाया एवाग्निहोत्रादावधिकारस्य प्रतिपादनेन सवर्णाया एवाधि-कारेण बौधायनवचनस्य सवर्णामात्रविषयकत्वौचित्यात्, अस-वर्णायाश्च

भर्तुः शरीरशुश्रूषा धर्म्यं कार्यं च नैत्यिकम् ।
सास्यैव कुर्यात् सर्व्वेषां नासवर्णाः कदाचन ॥

इति मनुना धर्म्यकार्य्यमात्रेऽनधिकारस्य प्रतिपादनेन असवर्णागतबहुत्वविषयकस्यानुचितत्वात् प्रागुक्तेन "नैकयापि विना कार्य्यम्" इति कात्यायनवचनेन एकदा बहूभिः सार्द्ध-मग्न्याधानविधानेन कालान्तरभाविवन्ध्यत्वादिकृतबहुत्वविष-यकताया अनुचितत्वाच्च । किञ्च

"कारयेत्तद्बहुत्वे चेति कात्यायनवचने सवर्णागतबहुत्वे सति ज्येष्ठयेति" निर्देशेन सवर्णामात्रगतमेव बहुत्वं प्रतीयते न तु सवर्णासवर्णागतं, कालान्तरे वन्ध्यत्वादिकारणकृतसवर्णा-विवाहविषयकत्वं वा "नैकयापि विना कुर्य्यादित्यादिप्रागुक्त-कात्यायनवचने सर्व्वाभिः सहैव युगपदग्न्याधानादेर्विधानात् अग्न्याधानस्य च सवर्णामात्रविषयकत्वात् ।

Digitized by Google

एवञ्च श्रुतौ तन्मूलकस्मृतौ च सवर्णागतबहुत्वावगतौ तदेकवाक्यतया

उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्।

इति मानववचने एकत्वमुद्देश्यगतत्वेनाविवक्षितम्। यथा-यहं संमार्ष्टीत्यादौ मार्ज्जनरूपसंस्कारोद्देश्यतया पात्रविशेषरूपयद्गतसंख्याया अविवक्षितत्वमेवं विवाहरूपसंस्कारोद्देश्यतया सवर्णागतैकत्वसंख्याया अविवक्षितत्वमिति मीमांसासिद्धान्तसरणिरनुसरणीया। तत्र "दश ग्रहान् गृह्णाति" इत्यादिश्रुत्यन्तरवत् "तस्मादेको बह्वीर्विन्देत" इति श्रुत्यन्तरस्य सत्त्वेन तुल्यरूपत्वात्। यथा च

याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्ज्जयेदिति

अत्र उपार्ज्जनकर्म्मधनगतैकत्वसंख्याया अविवक्षितत्वमेवं पुरुषार्थतया धनार्ज्जनतुल्यविवाहकर्म्मगतयोद्दिष्टैकत्वसंख्याया अविवक्षितत्वम्। अत एवात्र कपिञ्जलाधिकरणन्यायेन न बहुत्वं त्रित्वपर्य्यवसायि विवाहस्य पुरुषार्थत्वेन क्रत्वर्थत्वाभावात्ततो वैलक्षण्यात्। तत्र हि आलम्भनकर्म्मकपिञ्जलगतबहुत्वस्य त्रित्वावधिपरार्द्धान्तविश्रान्तत्वेन कतिभिः क्रतुसिद्धिः स्यादिति? अनध्यवसायात् बहुत्वं त्रित्वपर्य्यवसायीति स्थिरीकृतं स्थिरीकृता च तत्र कपिञ्जलत्रयालम्भनेऽपि क्रतुसिद्धिरिति। इह तु विवाहस्य पुरुषार्थतया यावदिच्छं विधानसम्भवेनानध्यवसायाभावान्न तथाकल्पनमिति विशेषः। वक्ष्यमाणेन

चतुर्वादिविवाहार्थं स्तोकेऽर्के बहुत्वहेतिति

मत्स्यपुराणवचनेन चतुरादिविवाहस्य विधानेन न बहुत्वं त्रिलपर्य्यवसायीति निर्णीयते।

शिष्टाचारोऽपि श्रुतिस्मृत्योः वर्णितविषयत्वमुद्घोषयति। तथा च ते हि शिष्टाः दर्शितविषयकत्वमेव श्रुतिस्मृत्योरवधार्य्य युगपद्बहुभार्य्यावेदने प्रवृत्ता इति पुराणादौ उपलभ्यते।

ददौ च दश धर्म्माय कश्यपाय त्रयोदश।

इति मानवे महाभारते च दक्षप्रजापतेरेकैव कश्यपादिभ्यो बहुकन्यादानप्रतिपादनेन तद्दानाधीनविवाहस्यार्थात् बहुत्वस्य प्रतिपादनात्। यदि कश्यपादयः स्वयं स्मृतिप्रणेतारः बहुभार्य्यावेदनमशास्त्रीयमिति जानीयुः कथं तत्र प्रवर्त्तेरन्? अतस्तेषामाचारदर्शनेनैव उपदर्शितप्रकार एव शास्त्रार्थः नान्यथेत्यवधार्य्यते। एतेन स्मृतिविरोधेन शिष्टाचारस्य न प्रामाण्यमित्यवष्टम्भेन विद्यासागरस्य प्रत्यवस्थानमपि परास्तम्। यदि वयं शिष्टाचारमेव तादृशधर्म्मे प्रमाणमाचक्ष्महि भवेदेवं तदा तस्य स्मृतिविरोधेन शिष्टाचारस्याप्रामाण्योपन्यासः तदेव नास्ति। किन्तु श्रुत्यादिभिरेवावधारिते बहुसवर्णायुगपद्विवाहे परिशुद्धत्वबहुसम्मतत्वख्यापनायैव शिष्टाचारस्य समुत्कीर्त्तनं, यथा च

आगमो निष्फलस्तत्र भुक्तिः स्तोकापि यत्र नो।

इत्यत्र भोगसहितागमस्य भुक्तिरहितागमापेक्षया प्राब-

Digitized by Google

स्यम् एवमाचारानुमोदितस्यैव शास्त्रार्थनिश्चयस्य प्रामाण्यमित्येव ज्ञापयितुं तथोत्कीर्त्तनम्।

एतेन कश्यपादीनामाचारस्य विगीतत्वेनोत्कीर्त्तनेन तेजीयस्त्वेन दोषराहित्योक्त्या च तस्य प्रत्यवस्थानमप्यपास्तम् आचारस्य विगीतताया: शास्त्रनिषिद्धतानतिदृत्तेः बहुविवाहनिषेधस्य क्वाप्यनुपलब्धेः। किञ्च तदुक्तरीत्या यदि दोषत्रयग्रस्तपरिसंख्यापरतां मानववचनस्य ते अध्यगमिष्यन् तदा ते बहुविवाहकरणे नैव प्रावर्त्तिष्यन्त। न च तेषां तादृशी बुद्धिरक्तिरासीत् यथा दोषत्रयग्रस्तपरिसंख्यापरत्वकल्पनेनाभिनवार्थमध्यवस्येयुः न वा विद्यासागरसन्निभः जीवनिभः धीसचिवस्तैरासादि येन मानववचनस्य परिसंख्यापरत्वं विज्ञाप्य अधर्म्मभीरवस्ते अधर्म्मपथात् व्यवारयिषत।

यथा च मनुवचनस्य न परिसंख्यापरत्वं तथाग्रे सविस्तरमभिधास्यते। नचान्यत् किञ्चित् बहुविवाहनिषेधकं वचनमस्ति येन बहुविवाहस्य विगीतत्वं स्यात्। न च

एकैव भार्य्या स्त्रीकार्य्या धर्म्मकर्म्मोपयोगिनी।
प्रार्थने चातिरागे च व्याधावेकापि च द्विज!॥

इति पुराणवचने एकैवेति एकसंख्यानिर्द्धारणेन बहुभार्य्यानिषेध इति शङ्क्यम् एतद्वचनस्य समूलत्वे एकाशब्दस्य मुख्यावाचितया सवर्णापरत्वात्। तदुत्तरमेकवचनन्तु प्रागुक्तमानववचन इवाविवक्षितम् अन्यथा पुराणवाक्येन श्रुतिस्मृतिसङ्कोचे तस्य विस्पष्टकारिता व्याहन्येत तच्च पूर्व्वमेव दर्शितम्।

Digitized by Google

किञ्च अत्र एकाग्रब्दस्य मुख्यापरत्वमवश्यं स्वीकर्य्यं न तु संख्यापरत्वमुत्तरार्द्धे अनेकाग्रब्दस्य एकवचनान्ततया निर्द्देग्रस्यैव तत्र लिङ्गत्वात् सति हि संख्यापरत्वे उत्तरार्द्धे अनेकाग्रब्दस्य "अनेके सेवन्ते भवदधिकगीर्व्वाणनिवहान्" इत्यत्रेव "पतन्त्यनेके जलधेरिवोर्म्मयः" इत्यत्रेव च बहुवचनान्ततया निर्द्देग्रापत्तिः । एतेन ग्राह्मानेका अपि द्विजेति अनेकाग्रब्दस्य बहुवचनान्तताकल्पनमप्यपास्तम् तथात्वे तद्विग्रेषणस्य ग्राह्माग्रब्दस्यापि बहुवचनान्ततापत्तेः एवञ्च ग्राह्मा अनेका अपीति स्यात् अतोऽत्र विस्मृत्यकारिणा विमर्षपूर्व्वकं पाठसमर्थनं कर्त्तुं युक्तं तच्च न क्षमामित्यतीव नः खेदाय ।

वचनार्थस्तु अर्थ्यतेऽनेनेति अर्थनमभिलाषः तस्मिन् प्रकर्षेणाभिलाषे, कस्येत्यपेक्षायां प्रागुक्तमनुवचनोपात्तविवाहफलत्रयमध्ये धर्म्मस्य पूर्व्वार्द्धे उक्तेः अतिरागे इत्यनेन रतेश्चोक्तेः परिग्रेषात् पुत्रस्यैव कर्म्मतया तत्राग्रयः तथा च बहुपुत्रेच्छायां विग्रिष्टरतीच्छायाञ्च अनेका असवर्णा अपिग्रब्दात् सवर्णा ग्राह्मा इति । अत्रापि एकत्वमविवक्षितं तुल्ययुक्तेः । एतच्च

सवर्णाग्रे द्विजातीनां प्रग्रस्ता दारकर्म्मणि ।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः इति ॥

मानववचनसमानार्थकम् ।

एवमेकदा बहुसवर्णाविवाहपक्षे स्मृत्यादिभिः समवधारिते इदानीं क्रमग्रोऽपि बहुसवर्णाविवाहपक्षो व्यवस्थाप्यते ।

ग्राद्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि ।

तदा वैवाहिकं कर्म्म कुर्य्यादावसथेऽग्निमान् ॥

इति निर्णयसिन्धुधृतचिकाण्डमण्डनवाक्येन ।

यदारोऽग्न्यात् पुनर्हारान्तरहोर्द्वं कारणान्तरात्
यदीच्छेदग्निमान् कश्चित् क्व होमोऽस्य विधीयते
स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचनेति

माधवाचार्य्यविधानपारिजातादिधृतकात्यायनस्मृत्या च विद्यमानभार्य्यस्यापि भार्य्यान्तरं विहितं तच्च सवर्णामात्रविषयम् अग्न्याधाने सवर्णाया एवाधिकारिताया: पूर्व्वं प्रतिपादनात्। अत एव

अथाग्न्योर्गृह्ययोर्योगं सपत्नीभेदजातयोः ।
सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि यौनकः ॥

इति निर्णयसिन्धुधृतयौनकवचने सहाधिकारसिद्धये द्वयोरग्न्योरेकत्र समाधानमुक्तम्। अन्ते च

पत्न्योरेका यदि मृता दग्ध्वानेनैव तां पुनः ।
आदधीतान्यया सार्द्धमाधानविधिना गृही ति ॥

द्वयोः पत्न्योर्मध्ये एकस्यामरणे (अनेनैव) उभयसञ्चारितेन वह्निना (तां दग्ध्वा) (अन्यया) वर्त्तमानया सह आदधीतेति पुनराधानं विहितम्। एवञ्च विद्यमानायामेव सवर्णायां स्त्रियां पुनर्विवाहान्तरकरणं प्रतीयते। तच्च कात्यायनवचने कारणान्तरादित्यस्य उद्देश्यान्तरादित्यर्थः यदीच्छेदिति पदसंस्कारात् सति हि उद्देश्ये इच्छोदयात्। एवञ्चान्तरवचनं सार्थकं स्यात् भवति च धर्म्मोद्देशेन कृतविवाहस्यापि पुनः पुत्रप्रतिरूपो-

Digitized by Google

हेत्वभेदात् विवाहेच्छा । न च कारणशब्दस्य हेतुपरत्वं शङ्क्यम्, तथात्वे कारणादित्येव ब्रूयात् धर्मार्थविवाहे निमित्ताभावेन ततो भिन्नार्थकान्तरपदलभ्यार्थस्य प्रकृतेऽभावात् ।

एवञ्च विद्यमानायां स्त्रियां विवाहकरणमधिवेदनं तच्च द्विविधं पुत्रार्थं रत्यर्थञ्च । तत्र पुत्रार्थे अधिवेदने वन्ध्यत्वादीनि निमित्तानि, अपेक्षितानि तन्निमित्तसत्त्वे च तत्तत्कालातिक्रमे पूर्व्वोढ़ायाः अयनाद्यौ परिहारपूर्व्वकं द्वितीयविवाहकरणम्

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् ।
मृतप्रजां पञ्चदशे सद्यस्त्वप्रियवादिनीम् ॥

इति निर्णयसिन्धुधृतसंग्रहवाक्येन दशमादिवर्षे पूर्व्वोढ़ायाः अयनादौ परित्यागविधानात् । एवञ्च पुत्रार्थाधिवेदने वन्ध्यत्वाद्यावेदककालः अपेक्षितः तत्कालोत्तरं तु तां परित्यज्य इतरां वोढुं शक्नोति । रत्यर्थे तु विवाहे न कालविशेषः आद्रियते किन्तु पूर्व्वोढ़ायाः धनादिना तोषणमात्रमपेक्षितमित्येव विशेषः

एकामुद्वा तु कामार्थमन्यां वोढुं य इच्छति ।
समर्थस्तोषयित्वार्थैः पूर्व्वोढ़ामपरां वहेत् ॥

इति मदनपारिजातधृतस्मृतेः । पराशरभाष्ये विधानपारिजातादौ च एकामुत्कम्येति पाठः । अत्रैव मनुना

अधिविद्या तु वा नारी निर्गच्छेद्रोचिता सकात् ।
सा सद्यस्तु निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥ इति

अधिवेदनकारणसत्त्वे तत्तत्कालाधिवेदने तोषमन्तरेण गृह्याग्निगतौ च परित्यागो विहितः। ततश्चायमेव विशेषः यत् पुत्रार्थाधिवेदने बन्ध्यत्वादिकारणे अनुमतिमन्तरेणापि, कामार्थे तु अनुमत्येति। एवञ्च मनुयाज्ञवल्क्यादिस्मृतिषु बन्ध्यत्वनिमित्तककालप्रतीक्षावश्यकताकथनं तदूर्द्धमन्तरेणाप्यनुमतिं तां परित्यज्य इतरां वोढुं शक्यते इत्येवमर्थम्, तत्परतयैव तत्तद्वचनानां सार्थक्ये नैमित्तिकविवाहान्तरकल्पनं निर्मूलमेव एवमेव चतुर्व्वेदव्याख्याद्दमाधवाचार्य्येण पराशरभाष्ये व्यवस्थापितम्। न च

उद्वहेदितिसिद्ध्यर्थं तृतीयां न कदाचन।
मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम्॥
नष्टस्यैव न सन्देहो गर्गस्य वचनं यथेति।

निर्णयसिन्धुधृतमत्स्यपुराणवचने रत्यर्थकतृतीयविवाहनिषेधः ग्राह्यः, तस्यार्कविवाहस्तावकत्वेन अर्कविवाहविधानानुसारेण तृतीयस्यापि चतुर्थतासम्पादनपरत्वात्। अत्रेदं बोध्यम्।

अपाकृत्य तृतीयार्थं तृतीयां स्त्रियमुद्वहेत्।

इत्युपक्रम्य

पुत्रपौत्रादिसम्पन्नः कुटम्बी साग्निको द्विजः।
उद्वहेदितिसिद्ध्यर्थं तृतीयां न कदाचन।
मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम्।
नष्टस्यैव न सन्देहो गर्गस्य वचनं यथा। इति

Digitized by Google

विधानपारिजातादिधृते मत्स्यपुराणे कश्यपवचने च पुत्रपौत्रादिसम्पन्नस्य साग्निकस्य कुटुम्बवतः द्विजस्य रतिसिद्ध्यर्थं द्वितीयविवाहे मानुषा निषेधेन तादृशाधिकारिण एव रत्यर्थकद्वितीयविवाहनिषेधात् अन्यस्य रत्यर्थद्वितीयविवाहस्य न निषेध इति गम्यते विशेषणसार्थक्यात् गौनकेन तु तादृशाधिकारिणोऽपि दोषपरिहारार्थं होमादिपूर्व्वकार्कविवाहकरणानन्तरं चतुर्थविवाहोऽभिहितः ।

द्वितीयस्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु ।
अर्कं विवाहं वक्ष्यामि गौनकोऽहं विधानतः इत्युपक्रम्य
विसृज्य होम्यमग्निञ्च विधिना मानुषीं पराम् ।
उद्वहेदन्यथा नैव पुत्रपौत्रादिसिद्धिदाम् ।
विसृज्याग्निं कृतघ्नश्च मानुषीमुद्वहेत् पराम् ।
अनेन विधिना वस्तु कुर्य्यादर्कविवाहकम् ।
पुत्रपौत्रादिसम्पत्तिः चतुर्थ्यां लभते नरः ।

इत्यन्तेन तेनोपसंहारात् । एवञ्च पुत्रपौत्रादिमतः रत्यर्थं द्वितीयविवाहं चिकीर्षोरर्कविवाहं कृत्वैव चतुर्थविवाहः कर्त्तव्यः नान्यथेति प्रतीयते न तु द्वितीयविवाहमात्रं निषिध्यते इत्यत्रैव सकलवचनतात्पर्य्यम् ।

चतुर्थादिविवाहार्थं द्वितीयेऽर्कं वदन्ति हेदिति ।

विधानपारिजातनिर्णयसिन्धुधृतसंग्रहवाक्येन स्पष्टं तथैवोक्तत्वात् । एतेन पुत्रपौत्रादिमतः साग्निकस्य कुटुम्बरूपजायावतश्च रत्यर्थं द्वितीयविवाहेच्छायाम् अर्कविवाहपूर्व्वकं चतुर्थ-

Digitized by Google

विवाहस्य विधानात् स्पष्टं क्रमशोऽपि बहुविवाहपक्षः सुपपन्नः ।

अर्कविवाहप्रकारस्तु विधानपारिजाते विस्तरेणोक्तस्तत्रैव द्रष्टव्यः । अत्र चतुर्थादिविवाहार्थमित्युक्तेश्च बहुत्वं न नित्यपर्य्यवसायीति यदुक्तं तद्दुष्टदीक्षितं वेदितव्यम् । एतेन चतुर्थादिविवाहस्य वन्ध्यापत्नीकविषयकत्वस्य क्रमशः मृतपत्नीकविषयकत्वस्य वा कल्पनमप्यपास्तम् । साग्निकत्वविशेषणेन स्त्रिया विद्यमानताप्रतीतेः पुत्रपौत्रादिमत्त्वविशेषणेन च वन्ध्यस्त्रीविषयकत्वासम्भवात् ।

इदानीं क्रमशो बहुविवाहे कालविशेषो निमित्तविशेषश्चाभिधीयते । तत्र मनुना

जायायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि ।
पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च ॥

इति दारमरणरूपः एकः कालः अभिहितः ।

अत्र विशेषयति विधानपारिजातधृतबौधायनसूत्रम् ।

धर्म्मप्रजासम्पन्नेऽदारे नान्यां कुर्वीत
अन्यतराभावे वान्यां प्राणग्नीनाधेयेति ॥

दाराणामभावः अदारम् अर्थाभावेऽव्ययीभावः ततः सप्तम्या बहुलमलुक् । सम्पन्नं सम्पत्तिः भावे क्तः । धर्म्मस्य अग्निहोत्रादिकस्य गृहस्थकर्त्तव्यस्य यावद्धर्म्मस्य, प्रजायाश्च सम्पन्नौ सत्यां दाराभावे अन्यां स्त्रियं न कुर्वीत नान्यामुद्वहेदित्यर्थः । किन्तु वनं मोक्षं वाश्रयेत्

ऋणत्रयमपाकृत्य मनोमोक्षे निवेशयेत् इति

मनुना ऋणत्रयापाकरणे मोक्षाधिकारित्वसूचनात्

जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण
ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजया पितृभ्य इति

ऋष्यादित्रयस्य वेदाध्ययनाग्निहोत्रादियागपुत्रोत्पत्तिभिरपाकरणात् यावद्गृहस्थकर्त्तव्यकरणाच्च न दारान्तरकरणं तत्फलस्य धर्म्मपुत्रादेः कृतत्वात्। किन्तु यदि न रागनिवृत्तिस्तदा तत्फलार्थंविवाहकरणं भङ्गीकृम्। धर्म्मप्रजेति विशेषणाच्च रतिफलविवाहस्य तदा कर्त्तव्यतेति गम्यते अन्यथा धर्म्मप्रजेति नाभिदध्यात् तथाच ऋणत्रयशोधने अनुपयोगितया तत्तत्फलमुद्दिश्य न विवाहान्तरकरणमिति सिद्धम्। (अन्यतराभावे) धर्म्मप्रजयोर्मध्ये एकतराभावे धर्म्माभावे पुत्राभावे वा (अन्या कार्य्या) प्राग्वत् आग्नराधया यया तया कार्य्येत्यर्थः। एवञ्च मनुना द्वितीयविवाहे यद्दारमरणकालः उक्तः तस्य अन्यतराभावविषयकत्वं न तु जायामरणमात्रे एव जायान्तरकरणविषयकत्वम्। ततश्च मनुवचनेन जायामरणे जायान्तरकरणं यत् प्राप्तं तत्धर्म्मप्रजासम्पत्तौ निषिध्यते "प्राप्तं हि प्रतिषिध्यते" इति न्यायात् तथा च मनुवचनस्य अवकाशविशेषदानार्थमेव अन्यतराभावे इत्यादि प्रतीकं प्रवृत्तम्। एतेन धर्म्मप्रजासम्पन्ने दारे नान्यां कुर्व्वीतेति प्रतीकमाद्यं धृत्वा उत्तरप्रतीकं निगुह्य यत् धर्म्मप्रजासम्पन्नयुक्तदारसत्त्वे दारान्तरकरणनिषेधकतया कल्पनं तदतीव अयुक्तिकं दारेषु सत्सु दारान्तरकरणं यदि तन्मते क्वचित् प्राप्तं स्यात् तदा तत् प्रति-

Digitized by Google

विधेत। प्रागग्न्याधेयेति वचनाच्चैतद्वचनस्य सवर्णाविषयकत्वे स्थिते कामतः प्रवृत्तविवाहविषयकत्वेन न प्राप्तिसम्भवः तन्मते कामतो विवाहस्य असवर्णामात्रपरत्वात्। किञ्च धर्म्मप्रजा-सम्पन्न इत्युक्त्वा तदर्थविवाहमात्रविषयकत्वावगमेन रत्यर्थ-विवाहविषयकत्वकल्पनमप्ययुक्तिकं तत्पदवैयर्थ्यापत्तेः उभय-फलसिद्धौ दारसत्त्वे दारान्तरकरणं निषिध्य, तदेकतराभावे धर्म्माभावे पुत्राभावे च दारसत्त्वे दारान्तरकरणं कथमेकमात्र-विवाहवादिमते सङ्गतं स्यात्। तन्मते पुत्राभावे दारसत्त्वे दारान्तरकरणस्य विहितत्वेऽपि अग्निहोत्रादियावत्कर्त्तव्य-धर्म्माभावेऽपि पुत्रसत्त्वे च दारान्तरकरणस्य निषिद्धत्वात् एतेन यति च अदारे इति हेदैनैव सर्व्वसामञ्जस्ये "दाराग्नितन्त्राणां बहुत्वं च" इति पुंस्त्वाधिकारीयं याज्ञिनीयं लिङ्गानुशासन-मुल्लङ्घ्य दारशब्दस्य एकवचनान्तताङ्गीकारः अगतिकगति-तया हेय एव।

न च रत्यर्थकस्यासवर्णामात्रविवाहस्य प्राप्ततया धर्म्म-प्रजासम्पत्तौ नान्यामित्यनेन निषेधः, रत्यर्थविवाहस्य असवर्णा-मात्रविषयकत्वे प्रमाणाभात् बाधकमन्तरेण सवर्णाविषयकत्व-स्यापि सम्भवात्। किञ्चोत्सर्गापवादयोरेकविषयकत्वेन अप-वादस्य अन्यतराभावे प्राग्वदग्न्याधानपूर्व्वकस्य दारकरणस्य सवर्णामात्रविषयकत्वापत्तेः उत्सर्गस्यापि नान्यामिति निषेध-स्यापि सवर्णामात्रविषयकत्वौचित्यम्। ततश्च

अग्न्याधेयोर्द्ध्वं प्रथमोर्थोयं सपत्नीभेदजातयोः।

इत्यादि प्रागुक्तनिर्णयसिन्धुधृतगौनकवचनेन क्रमशः ज्ञ्ठाया: सहाधिकारसिद्ध्यर्थमन्याधानविधानेन अग्न्याधाने च सवर्णाया एवाधिकारेण क्रमशः सवर्णाविवाहः कर्त्तुं शक्यते इति स्पष्टं प्रतीयते, प्रतीयते च प्रागुक्तविधानपारिजातधृते

पुत्रपौत्रादिसम्पन्नः कुटुम्बी वाग्निको द्विज इत्यादि

वचने पुत्रपौत्रादिमतः जायावतश्च द्वितीयविवाहनिषेधेन द्वितीयविवाहः । तद्विषये एव प्रागुक्तगौनकवचने रत्यर्थम् अर्कविवाहपूर्व्वकं चतुर्थादिविवाहः कर्त्तुं शक्यते इति च स्पष्टमवगम्यते । ततश्च बह्वीनां सवर्णानामपि क्रमशो विवाहः शास्त्रसिद्ध इति सिद्धम् ।

तदयं निर्गलितोऽर्थः । क्रमशः धर्म्मार्थं द्वितीयविवाहे गृहस्थोचितसर्व्वधर्म्माभावे पत्नीमरणकालः एकः । पुत्रार्थविवाहे तु पुत्राभावसहकृतपत्नीमरणकालः एकः । पत्नीवन्ध्यत्वादिकालः द्वितीयः । तत्रापि तदवधारणे तदनुमतिमन्तरेणापि तां परित्यज्य विवाह इति विशेषः । रत्यर्थविवाहे तु पत्न्यन्तरसत्त्वे पुत्रपौत्रादिसत्त्वेऽपि इच्छाकालः एकस्तत्रापि द्वितीयमात्रविवाहः कर्त्तुं शक्यते द्वितीयादिविवाहकरणेच्छायान्तु तत्समये अर्कविवाहं कृत्वा चतुर्थादिविवाहः कर्त्तुं शक्यते इति तत्र तु पूर्व्वोढपत्नीसम्मत्यपेक्षेति विशेषः । रत्यर्थविवाहस्तु सवर्णाविषयः असवर्णाविषयश्चेति ।

तदेवं सवर्णामात्रविषयकैकविवाहमात्रपक्षस्य विपक्षसम्मतस्य अपाकरणेन "कति विवहेत्" इत्यपेक्षायां बह्वीः युगपत्

क्रमशो वा विवहेत् इत्याकाङ्क्षापूरणेन सपत्ने स्त्रिरीकृते इदानीं का विवहेदित्याकाङ्क्षापरिपूरणार्थमभिधीयते ।

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि ।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः ॥
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः ॥

इति मनुवचनम् (अग्रे) स्वोक्तधर्म्यरतिपुत्ररूपविवाहफलत्रयमध्ये श्रेष्ठे धर्म्ये इत्यर्थः निमित्तार्थे सप्तमी तथा च धर्म्यनिमित्ते (दारकर्म्मणि) दारत्वसम्पादके संस्काररूपे क्रियाकलापे (द्विजातीनां सवर्णा प्रशस्ता) मुनिभिर्विहिता (तु) पुनः (कामतः) रतिकामतः बहुपुत्रकामतश्च (प्रवृत्तानाम्) तदुपायसाधनार्थं यत्नवतां दारकर्म्मणीत्यनुषज्यते (इमाः) वक्ष्यमाणाः सवर्णादयः (क्रमशः) वर्णक्रमेण (वराः) विहितत्वेन श्रेष्ठा इत्येवमर्थपरम् । तासां च वरत्वं पिण्डदानयोग्यधनविशेषहारिपुत्रोत्पत्तिसाधनत्वात् तथा च सवर्णाया अलाभे अनन्तरवर्णाम्, तस्या अप्यलाभे तदनन्तरवर्णां विवहेदिति समुदितार्थः । अत्राप्येकत्वमविवक्षितं प्रागुक्तयुक्तेः, इच्छाया निरङ्कुशत्वाच्च यावदिच्छं तावद्विवाहस्योचितत्वात् । एतदभिप्रायेणैव एतत्समानार्थकस्य

भार्याः कार्याः स्वजातीयाः सर्वेषां श्रेयस्यः स्युरिति
मुख्यः कल्पस्तदेकल्पस्तु चतस्रो ब्राह्मणस्य
तिस्रो राजन्यस्य, द्वे वैश्यस्येति ।

पैठीनसिवचनस्य तात्पर्यावद्योतनार्थं दायभागगता चतुरादिसंख्या जात्यवच्छेदेनेत्युक्तम् चतुर्जात्यवच्छिन्नतया विवाहं व्यवस्थापयता च तेन एकैकवर्णाया अपि पञ्चादिसंख्या न विरुद्धेति द्योतितं तच्च दृच्छायानिरङ्कुशत्वेनैव प्रागुक्तवचनजातेन विवाहबहुत्वप्रतिपादनेन च सुदूरूक्तमित्युत्पश्यामः ।

प्रार्थने चातिरागे च आम्नायेकापि च द्विज ! ।

इति प्रागुक्तपुराणवचनेनापि धर्मकार्यार्थं सवर्णां विवाह्य बहुपुत्रेच्छायामतिरागे च असवर्णा अपि विवाह्येति प्रतिपादितम् । अत्रैकानेकशब्दयोर्यथा सवर्णासवर्णापरत्वं तथा दर्शितं प्राक् । रत्यर्थं पुत्रपौत्रादिमतः आयावतश्च चतुर्थादिविवाहसिद्ध्यर्थमेकविवाहं प्रतिपादयता च प्रागुक्तेन गौनकवचनेन चतुर्थादिपदात् बहुविवाहस्यापि विहितत्वमवगम्यते । तत्र एकत्वसंविवक्षितमित्ययुक्तम् । अत एव पुत्रकामेण सौभरिणा एकैव वक्रः क्षत्रिया व्यूढा इति पुराणनिर्देशः । सोऽप्यत्रानुग्राहकः ।

इत्येवं रतिकामस्य बहुपुत्रकामस्य च सवर्णासवर्णागतबहुत्वविषयके विवाहे व्यवस्थापिते प्रतिवादिना यत् मनुवचनम् परिसंख्यापरत्वेन कल्पितं तत् प्रतिवक्तव्यम् ।

तथा हि मानववचनस्य यत् परिसंख्यापरत्वं कल्प्यते तत् कस्य हेतोः ? न तावत् तस्य परिसंख्याकल्पकं किञ्चित् वच-

नान्तरमस्ति, नापि युक्तिः, न वा प्राचीनसन्दर्भसम्मतिः। तथा च असति परिसंख्याकल्पकवचनयुक्त्यादौ दोषत्रयग्रस्तां परिसंख्यां स्वीकृत्य मानववचनस्य यत् दोषत्रयकलङ्कपङ्के निक्षेपणं कृतं तत् केवलं स्वाभीष्टसिद्धिमनीषयैव। पारिसंख्यायां हि

श्रुतार्थस्य परित्यागात् अश्रुतार्थस्य कल्पनात्।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका स्मृतिः॥

श्रुतार्थत्यागाश्रुतार्थकल्पनप्राप्तबाधरूपं मीमांसाशास्त्रसिद्धं दोषत्रयं स्वीकार्यं तस्य च सति गत्यन्तरे नैवाङ्गीकार्यता। तत्र प्राप्तिश्च शास्त्रतो रागतो वा नियता। एवञ्च प्रागुक्तरीत्या मानवचनस्य अप्राप्तिप्रापकत्वरूपोत्पत्तिविधिपरतयैवोपपत्तौ न परिसंख्यापरत्वम्। न च सवर्णाविवाहस्य प्राप्तत्वेन तदंशेऽनुवादापत्तिः, धर्मकामस्य सवर्णाविवाहस्य प्राप्तत्वेऽपि विशिष्टरतिपुत्रकामयोरप्राप्ततया तत्तत्कामनावतश्च तत्तत्फलसिद्धये प्रवृत्त्यौपयिकत्वेनोत्पत्तिविधित्वसम्भवात् यथा "खादिरे पशुं बध्नाति" इत्यादिवाक्येन नित्यप्राप्तस्यापि यूपस्य "खादिरं वीर्यकामस्य यूपं कुर्वीत" इति वीर्यकामवतः खादिरत्वविधानमेवं विशिष्टफलस्य अप्राप्तेः तदंशे उत्पत्तिविधित्वं सम्भवत् केन वार्येत।

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥

Digitized by Google

इति भट्टोक्तस्य परिसंख्याहेतुभूतस्य तत्तदन्ययोः पक्षयोः प्राप्तिरूपस्य न क्वाप्य सम्भवोऽस्ति । तथा हि (तत्र) श्रुतपदार्थे (अन्यत्र) अश्रुतपदार्थे च प्राप्तेः केनचित् ? शास्त्रेण सम्भवोऽस्ति । येन तस्यां सत्यां श्रुतार्थत्यागः, अश्रुतार्थकल्पनम्, रागतः शास्त्रतो वा प्राप्तस्य बाध इत्येवं दोषत्रयं स्वीकार्यं तच्च गत्यन्तरे नैवाङ्गीकार्य्यमित्युक्तम् । प्रकृते च श्रुता सवर्णा असवर्णा च विवाहकर्मत्वेन, इमा इति इदमः पुरोवर्त्तिनीनामेव निर्देशकत्वेन अग्निमवचने च सवर्णाया असवर्णायाश्च स्वस्वपदेन निर्देशेन च तासामेव विवाहकर्मत्वावगमात् । ततश्च विहितं सवर्णागतम् असवर्णागतञ्च विवाहकर्मत्वं कस्मिन् ? शास्त्रान्तरेऽवगतम् कस्मिन् ? वा सवर्णासवर्णाभिन्नानां सङ्कीर्णवर्णानां विवाहकर्मत्वं प्राप्तं येन मानववचनस्य विवाहकर्मतया प्राप्तिसम्भवकथनेन इतरनिवर्त्तकपरिसंख्यापरत्वं कल्प्यते ।

यथा "इमामगृह्णन् रशनामृतस्य" इत्यादौ यज्ञाङ्गपश्वालम्भने गर्दभाश्वादेः रशनाग्रहणप्राप्तौ प्रवृत्तेन "इत्यश्वाभिधानीमादत्ते" इत्यादिवाक्येन अश्वाभिधानीरूपाश्वबन्धनरज्ज्वग्रहणं विधातुं न शक्यते प्राप्तत्वात् । अतः श्रुतविषये अश्रुतविषये च प्राप्तौ श्रुतार्थपरित्यागेन अश्रुतार्थकल्पनेन प्राप्तस्यापि बाधेन इतरनिषेधस्तत्र कल्प्यते ।

तथा हि "अश्वाभिधानीमादत्ते" इति वाक्यस्य स्वार्थपरत्वे "इमामगृह्णन् रशनामृतस्य" इति शास्त्रेण तस्य यज्ञाङ्गपशोः रशनाग्रहणस्य प्राप्तत्वेन विधित्वासम्भवः । अतस्तद्वाक्ये

श्रुत्याभिधानीपदम् श्रुत्यतिरिक्तगर्हाभादिरग्रनाथाम्, आदत्ते इति पदं च ग्रहणाभावे लाक्षणिकं, तथा च श्रुत्यतिरिक्तरत्नानां न गृह्णीयादिति वाक्यार्थः सम्पद्यते। एवं च स्वार्थपरित्यागेन अन्यार्थकल्पनेन सामान्यशास्त्रेण प्राप्तस्य गर्हाभादिरत्नाग्रहणस्य बाधेन परिसंख्यापरत्वमगत्या कल्प्यते। नैवमत्र उक्तदोषत्रयग्रस्तायाः परिसंख्यायाः सति गत्यन्तरे शास्त्रतायां बीजमस्ति येनामत्या तत्स्वीकारः। न चात्र विशिष्टपुत्रकामस्य विशिष्टरतिकामस्य च सवर्णायां असवर्णायां वा विवाहविधेकं किञ्चित् शास्त्रमस्ति। नापि रागतः प्राप्तिसम्भवः। यथा "पञ्च पञ्चनखान् भुञ्जीत" इति वाक्येन रागतः प्राप्तस्य पञ्चनखभोजनस्य विधानासम्भवेन पञ्चनखपदं अश्वादिपञ्चनखभिन्ने, भुञ्जीतेति पदञ्च न भुञ्जीतेति भोजनाभावे च लाक्षणिकमेवञ्च अश्वादिपञ्चकभिन्नपञ्चनखान् न भुञ्जीतेति तत्र वाक्यार्थः सम्पद्यते तत्र च श्रुतार्थस्य पञ्चनखपञ्चकरूपस्य परित्यागेन, अश्रुतार्थस्य तदतिरिक्तभोजनाभावस्य कल्पनेन, रागप्राप्तस्य अश्वादिभिन्नपञ्चनखभोजनस्य बाधेन च परिसंख्या दोषत्रयग्रस्तापगत्या स्वीक्रियते। नैवमत्र सम्भवति, सवर्णायां असवर्णायां वा विवाहस्य प्राग्दर्शितशास्त्रादिभ्यः अलौकिकसंस्कारापादकरूपतया शास्त्रमन्तरेण रागतः प्राप्तभावात्। ततश्च तत्तदन्यथोः प्राप्तिरूपस्य परिसंख्याबीजस्य असत्तेःसम्भवात् कथङ्कारं मानवचनस्य परिसंख्यापरत्वं स्यात्।

किञ्च विवाहस्य रागप्राप्तत्वाङ्गीकारे प्रथमविवाहस्यापि रागप्राप्ततया

सवर्णां स्त्रियमुद्वहेदित्यादि ।

मनुवचनस्यापि परिसंख्यापरत्वापत्तिः दुर्वारैव । स्त्रीजातञ्च विद्यासागरेणाद्यस्य वाक्यस्योत्पत्तिविधित्वमतः स्त्रीजातविहितत्वतया प्रत्यवस्थाने तस्य विहित्थकारिता कथङ्कारं तिष्ठेत् इत्या च विवाहस्य अलौकसंस्कारापादकत्वेन न रागप्राप्तत्वं तथा प्रतिपादितं पुरस्तात् । किञ्च परिसंख्यायामितरनिवृत्तिरेव विहिता विधिप्रत्ययार्थाश्रयत्वेव विहितत्वात् "अन्याभिधानीमादत्ते" इत्यादौ च अन्यातिरिक्तरजनाग्रहणाभाव इष्टसाधनं तादृग्रजनग्रहणाभावेन इष्टं भावयेदिति वा, "पञ्च पञ्चनखान् भुञ्जीत" इत्यादौ च शशादिपञ्चकभिन्नपञ्चनखभोजनं न इष्टसाधनम् इति तत्र तत्र विध्यर्थः फलितः तत्र च अन्यरजनाग्रहणे शशादिभोजने च तत्तद्विधेरौदासीन्यमेवेत्येवं परिसंख्यासरणौ स्थितायां मानववचनेऽपि सवर्णाया असवर्णाया वा विवाहे विधेरौदासीन्यमेव वाच्यं, केवलं तदतिरिक्तविवाहाभाव एव विहितः स्यात् तथा च क्षत्रियादीनाम् असवर्णानां कथं विवाहसिद्धिर्भवेत् । ततश्च क्षत्रियादिविवाहस्याविहितत्वेन तद्गर्भजातसन्तानस्यानौरसत्वापत्तिः । किञ्च क्षत्रियादिगर्भजातपुत्राणां विभागकथनादेव तद्विवाहस्य विहितत्वं मनोरभिमतमिति प्रतिभाति । तद्विरोधेन तेन क्षत्रियाद्यसवर्णाविवाहविधानस्य परिसंख्यापरत्वं कथं कल्प्येत

यदि स्याच्च परार्थैव विन्देरन् योषितो द्विजाः ।
तासां वर्णक्रमेणैव मदृक्षं पूजा च वेश्मनि चेति ।

मनुना सवर्णानामिवासवर्णानां "विन्देरन्" इत्यादिना विवाहानुवादेन गृह्यादिविशेषविधानात् असवर्णानां विवाह एव मनोरभिमतः न तु तदतिरिक्तविवाहाभावः । तथात्वे तासां विवाहावेदकशास्त्राभावेन कथङ्कारं विन्देरन्निति निर्दिश्येत । सत्येव च क्षत्रियादिविवाहस्य विहितत्वे तदनुवादेन पूजादिविशेषविधानं सङ्गच्छते नेतरथा । तथा एतद्वचनस्य स्वार्थपरत्वे एव क्रमश इति पदमपि सार्थकं न अन्यार्थपरत्वे, तस्य असवर्णारिक्तां न विवहेदित्येवंपरत्वेन तच क्रमशः इत्युक्तिरनर्थिकैव । अत एवाक्रमोढासन्तानस्यांशहारित्वाभावः स्मृत्यन्तरे दर्शितः । न च परिसंख्यायां स्वार्थपरत्वमपि केनचिदुपेयते अक्षरग्रनाग्रहणस्य तु "इमामगृह्णन्" इत्यादिशास्त्रेणैव प्राप्तत्वात् "इत्यक्षाभिधानीमादत्ते" इत्यादिवाक्यस्य स्वार्थपरत्वाभावात् स्वार्थपरत्वे परिसंख्यायाः स्वरूपानिष्पत्तेश्च । तथा च क्वचिदप्यदृष्टचरी दृष्टश्री परिसंख्यानिशाचरी तामसप्रियाणामेव मोदायालमपि नैव मीमांसासरणितरणिदीधितिनिःसारिततमस्तोमानां समुन्मीलितनेत्राणामालोड्यिततन्त्राणाम् ।

किञ्च मनुना इमामेति इदमा पुरोवर्त्तिनीनामेव दारकर्म्मणि वर्णक्रमेण वरत्वमुक्तं पुरोवर्त्तिन्यश्च ब्राह्मणस्य सवर्णा क्षत्रियादयस्त्रिस्रश्च, क्षत्रियस्य सवर्णा वैश्याशूद्रे च, वैश्यस्य

सवर्णा मुद्वा च, मुद्वस्य मुद्वैवेति । तच्च परिसंख्यापरत्वकल्पने श्रुताभ्यः एव सवर्णासवर्णाभ्यः अतिरिक्तविवाहनिषेधपरत्वं वाच्यं ततश्च कथङ्कारम् असवर्णातिरिक्तमात्रं निषेधेत । तथा च तथा कल्पनम् अर्द्धजरतीयन्यायमनुहरति । न हि

यवकः यवागूर्वी गोधा कर्कटी कूर्मश्च पञ्चमः ।
भक्ष्यान् पञ्चनखेष्वाहुः ।

इति मनुवचने श्वगृध्रादिपञ्चकादतिरिक्तपञ्चनखभोजनस्य निषेधके तन्मध्ये कस्यचिदेकस्यैव निषेधः कल्पयितुं शक्यते । एवमिहापि इमा इति पदेन परामृष्टानां मध्ये एकस्या एव परिसंख्याविषयत्वमयुक्तमेव । किञ्च श्रुतयोः सवर्णासवर्णाविवाहशेषीभूते किं सवर्णाविवाहस्य परिसंख्यापरत्वम् आहोस्वित् असवर्णाविवाहस्य ? न तावदाद्यः रतिकामानां सवर्णातिरिक्तविवाहस्य निषेधे क्षत्रियादीनामसवर्णतया तद्विवाहस्यापि निषेधापत्त्या तदनिष्टापातात् नापि द्वितीयः असवर्णातिरिक्तविवाहनिषेधे वन्ध्यत्वादिनिमित्तेनापि सवर्णाविवाहनिषेधापत्तेः । असति च शास्त्रान्तरे तन्निषेधपरत्वं कल्प्यते इति चेत् तदा सवर्णाविवाहस्यापि अस्मिन्नेव मनुवचने विधानेन एतस्यैव शास्त्रान्तरतया जागरूकत्वात् तन्निषेधानुपपत्तेः । एतेन मानववचनस्थं खेति पदं निगुह्य असवर्णाविवाहस्य परिसंख्यापरत्वकल्पनं निर्युक्तिकमसङ्गतञ्च । ततश्च असवर्णाविवाहस्य क्वचिदपि शास्त्रेऽप्राप्ततया तस्योत्पत्तिविधित्वौचित्ये स्थिते तदंशे परिसंख्यापरत्वकल्पनमतीव भ्रमादिकम् ।

Digitized by Google

किञ्च कामनावाचकपदसमभिव्याहारे विधेः परिसंख्यापरत्वं कथञ्चिदपि न सम्भवति। तथा हि "स्वर्गकामो यजेत" इत्यादिना विधिप्रत्ययार्थम् इष्टसाधनत्वं यागे बोधयता कामनाविषय एवं इष्टं बोध्यते तथा च यागः स्वर्गसाधनं यागेन स्वर्गं साधयेदिति वा तत्र वाक्यार्थः। परिसंख्यायाञ्च इतरनिवृत्तिपरत्वेन कामनाविषयफलस्य कस्मिन् विषये साधनत्वं प्राप्तं बोधयेत्? तथा च "पुत्रकामो रतिकामो वा विवहेत्" इति वाक्येन विवाहेन पुत्रं रतिं वा साधयेत् विवाहो वा तत्तद्फलस्य साधनमिति बोध्यते तत्र विधेः परिसंख्यापरत्वे असवर्णाविवाहो नेष्टसाधनमिति बोधे अनधिगते विवाहस्य पुत्ररतिसाधनत्वं नावगम्यते किन्तु तदतिरिक्तविवाहे अनिष्टसाधनत्वमात्रं ततश्च तत्तत्कामनावतः न तत्र प्रवृत्तिः। विधेरेष स्वभावः यत् स्वविषये समभिव्याहृतपदोपस्थाप्यकामनाविषयफलसाधनतां बोधयन् तत्तत्कामनाविशिष्टं नियोज्यं पुरुषं स्वविषये प्रवर्त्तयति। प्रकृते च असवर्णातिरिक्तविवाहस्य निषेधपरत्वे कथङ्कारं तत्तत्फलकामनया तत्र प्रवृत्तिः सम्भवेत्।

इत्येवं परिसंख्यापरत्वरूपाभिनवार्थकल्पनया स्वाभीष्टसिद्धये असवर्णातिरिक्तविवाहनिषेधपरत्वं यत् व्यवस्थापितं तन्निर्म्मूलं निर्युक्तिकं स्वकपोलकल्पितं प्राचीनसन्दर्भासम्मतं परिसंख्यासरण्यननुसृतं बहुविरोधग्रस्तञ्च प्रमाणपरतन्त्रैस्तान्त्रिकैरश्रद्धेयमेव। तस्य निवारणार्थं यद्यपि प्रयास एवानुचितः तथापि पण्डितम्मन्यस्य स्वाभीष्टसिद्धये तत्राग्रहवतः परि-

संख्याकपार्थकल्पनरूपावलेपवतश्च तत्तावलेपखण्डनेन तदाकर्षे विघ्नाशवतां संस्कृतपरिचयशून्यानाम् तदुद्भावितपदस्था बहुलदोषग्रस्तताबोधनायैव प्रयत्नः कृतः । परिशेषे इदमपि खेदेन प्रकाश्यते "यत् ईदृशपरिसंख्याकल्पनायाः निरासाय लेखनी व्यापारमासादयति, तादृशार्थकल्पने च ग्राम्यीयतया विश्वासः" अहो वैदग्धी प्रज्ञावतो विद्यासागरस्य "यत् अकिञ्चित्कराभिनवार्थप्रकाशनेन बहवो लोका व्यामोहिता इति" इत्यलमकिञ्चित्करपरिसंख्याकल्पनापोहार्थमनल्पजल्पनेन ।

तथा च रतिकामः बहुपुत्रकामस्य सवर्णा अपवर्णाश्च बह्वीर्भिन्द्येति सकलवचनतात्पर्य्यार्थ इति सिद्धम् ।

ओं तत्सत् शिवम् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचितः बहुविवाहवादः समाप्तः ।

संवत् १९२९ ।

217°
5

Digitized by Google

This book is a preservation photocopy.
It was produced on Hammermill Laser Print natural white,
a 60 # book weight acid-free archival paper
which meets the requirements of
ANSI/NISO Z39.48-1992 (permanence of paper)

Preservation photocopying and binding
by
Acme Bookbinding
Charlestown, Massachusetts
1996

Digitized by Google